# Shri Lakshminrisimha Dvadashanama Stotram

# શ્રીલક્ષ્મીનૃસિંહ દ્વાદશનામ સ્તોત્રમ્

## Document Information

Text title : Shri Lakshminrisimha Dvadashanama Stotram

File name : lakShmInRRisiMhadvAdashanAmastotram.itx

Category : vishhnu, dashAvatAra, viShNu, brahmapurANa, dvAdasha, stotra

Location : doc_vishhnu

Proofread by : Manoj Kumar Barman

Description/comments : nRRisiMhakosha 3 upAsanA khaNDa uttarArdha. brahmapurANe uttarakhaNDe

Latest update : August 11, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2025

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહ દ્વાદશનામ સ્તોત્રમ્

શ્રીગણેશાય નમઃ । શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।
અસ્ય શ્રીલક્ષ્મીનૃસિંહદ્વાદશનામસ્તોત્રમન્ત્રસ્ય ।
પુરન્દર ઋષિઃ । અનુષ્ટુભ્ છન્દઃ । શ્રીલક્ષ્મી પરમાત્માદેવતા ।
હ્રાં બીજમ્ । હ્રીં શક્તિઃ । હ્રૂં કીલકમ્ ।
મમસમસ્તપાપક્ષયાર્થં જપે વિનિયોગઃ ॥

અથ ન્યાસઃ ।
હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
હ્રીં તર્જનીભ્યાં નમઃ ।
હ્રૂં મધ્યામાભ્યાં નમઃ ।
હ્રૈં અનામિકાભ્યાં નમઃ ।
હ્રૌં કનિષ્ઠાકામ્ભ્યાં નમઃ ।
હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

હૃદયાભ્યાં નમઃ ।
હ્રાં હૃદયાભ્યાં નમઃ ।
હ્રીં શિરસે સ્વાહા ।
હ્રૂં શિખાયૈ વષટ્ ।
હ્રૈં કવચાય હુમ્ ।
હ્રૌં નેત્રત્રયાય વષટ્ ।
હ્રઃ અસ્ત્રાય ફટ્ ॥

અથ ધ્યાનમ્ ।
સત્યજ્ઞાન સુખસ્વરૂપમમલં ક્ષીરાબ્ધિમધ્યસ્થલિમ્
યોગારૂઢમતિ-પ્રસન્નવદનં ભૂષાસહસ્રોજ્વલમ્ ।
ત્ર્યક્ષં ચક્રપિનાકસાભયબરાબિભ્રાણમર્કછવિમ્
છત્રીભૂતફણીન્દ્ર બિન્દુધવલં લક્ષ્મીનૃસિંહં ભજે ॥ ૧॥

માનસોપચારૈઃ સમ્પૂજ્યમ્ ।
પ્રથમસ્તુ મહાજ્વાલોદ્વિતીયમુગ્રકેસરી ।
વજ્રનખસ્તૃતીયસ્તુ ચતુર્થશ્ચ વિદારણઃ ॥

સિંહસ્ય પઞ્ચમં ચૈવ ષષ્ઠં ચ અરિમર્દનમ્ ।
સપ્તમં રિપુહન્તાચ અષ્ટમં દેવવલ્લભઃ ॥

પ્રહ્લાદવરદો નવમં દશમં નૃહરિસ્તથા ।
એકાદશં મહારૌદ્રઃ દ્વાદશં કરુણાનિધિઃ ॥

એતાનિ દ્વાદશનામાનિ નૃસિંહસ્ય મહાત્મનઃ ।
મન્ત્રરાજેતિ વિખ્યાતઃ સર્વપાપહરં પરમ્ ॥

ક્ષયાપસ્મારકુષ્ઠ્યાદિ તાપ જ્વરનિવારણમ્ ।
રાજદ્વારે પથે ઘોરે સઙ્ગ્રામે શત્રુસઙ્કટે ॥

ગિરિકાનનસઙ્ઘાતે વ્યાઘ્રચોરભયં હરેત્ ।

ઇતિ શ્રીબ્રહ્મપુરાણે ઉત્તરખણ્ડે શ્રી લક્ષ્મીનૃસિંહ
દ્વાદશનામસ્તોત્રં સમ્પૂર્ણમસ્તુ ॥

This is similar to the nRisiMha dvAdashanAmastotraM

Proofread by Manoj Kumar Barman

*Shri Lakshminrisimha Dvadashanama Stotram*

pdf was typeset on August 11, 2025

Please send corrections to *sanskrit@cheerful.com*